योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३५

पञ्चत्रिंशः सर्गः ३५

श्रीवसिष्ठ उवाच ।

अथ प्रोड्डयनोद्युक्ततुरङ्गमतरङ्गकः ।

उत्ताण्डव इवोन्मत्तो बभूव स रणार्णवः ।। १

छत्रडिण्डीरविश्रान्तसितेषुशफरोत्करः ।

अश्वसैन्योल्लसल्लोलकल्लोलाकुलकोटरः ।। २

नानायुधनदीनीतसैन्यावर्तविवृत्तिमान् ।

मत्तहस्तिघटापीठचलाचलकुलाचलः ।। ३

कचच्चक्रशतावर्तवृत्तिभ्रान्तशिरस्तृणः ।

धूलीजलधरापीतभ्रमत्खड्गप्रभाजलः ।। ४

मकरव्यूहविस्तारभग्नाभग्नभटौघनौ ।

महागुडुगुडावर्तप्रतिश्रुद्धनकन्दरः ।। ५

मीनव्यूहविनिष्क्रान्तशरबीजौघसर्षपः ।

हेतिवीचीवरालूनपताकावीचिमण्डलः ।। ६

शस्त्रवारिकृताम्भोदसदृशावर्तकुण्डलः ।

संरम्भघनसंचारसेनातिमितिमिङ्गिलः ।। ७

कृष्णायसपरीधानवलत्सेनाम्बुभीषणः ।

कबन्धावर्तलेखान्तर्बद्धसैन्यादिभूषणः ।। ८

शरसीकरनीहारसान्धकारककुब्गणः ।

निर्घोषाशोषिताशेषशब्दैकघनघुंघुमः ।। ९

पतनोत्पतनव्यग्रशिरःशकलसीकरः ।

आवर्तचक्रव्यूहेषु प्रभ्रमद्भटकाष्ठकः ।। १०

कष्टाङ्कारकोदण्डकुण्डलोन्मथनोद्भटः ।

अशङ्कमेव पातालादिवोद्यत्सैनिकोर्मिमान् ।। ११

गमागमपरानन्तपताकाच्छत्रफेनिलः ।

वहद्रक्तनदीरंहःप्रोह्यमानरथद्रुमः ।। १२

गजप्रतिमसंपन्नमहारुधिरबुद्बुदः ।

सैन्यप्रवाहविचलद्धयहस्तिजलेचरः ।। १३

ससंग्रामोऽम्बरग्राम इवाश्चर्यकरो नृणाम् ।

अभूत्प्रलयभूकम्पकम्पिताचलचञ्चलः ।। १४

तरत्तरङ्गविहगः पतत्करिघटातटः ।

त्रस्तभीरुमृगानीकस्फूर्जद्धुरुघुरारवः ।। १५

सरच्छरालीशलभशतभङ्गुरसैनिकः ।

तरत्तरङ्गशरभः शरभारवनावनिः ।। १६

चलद्द्विरेफनिर्ह्रादो रसत्तूर्यगुहागुरुः ।

चिरात्स सैन्यजलदो लुठद्भटमृगाधिपः ।। १७

प्रसरद्धूलिजलदो विगलत्सैन्यसानुमान् ।

पतद्रथवराढ्याङ्गः प्रतपत्खड्गमण्डलः ।। १८

प्रोत्पतत्पदपुष्पौघः पताकाच्छत्रवारिदः ।

वहद्रक्तनदीपूरपतत्साराववारणः ।। १९

सोऽभूत्समरकल्पान्तो जगत्कवलनाकुलः ।

पर्यस्तसध्वजच्छत्रपताकारथपत्तनः ।। २०

पतद्विमलहेत्यौघभूरिभास्वरभास्करः ।

कठिनप्राणसंतापतापिताखिलमानसः ।। २१

कोदण्डपुष्करावर्तशरधारानिरन्तरः ।

वहत्खंगशिलालेखाविद्युद्वलयिताम्बरः ।। २२

उच्छिन्नरक्तजलधिपतितेभकुलाचलः ।

नभोविकीर्णनिपतद्द्युत्तारकणतारकः ।। २३

चक्रकुल्याम्बुदावर्तपूर्णव्योमशिराम्बुदः ।

अस्त्रकल्पाग्निनिर्दग्धसैन्यलोकान्तरक्रमः ।। २४

हेतिवर्षाशनिच्छन्नभूतलामलभूधरः ।

गजराजगिरिव्रातपातपिष्टजनव्रजः ।। २५

शरधाराघनानीकमेघच्छन्नमहीनभाः ।

महानीकार्णवक्षोभसंघट्टघटिताद्रवः ।। २६

व्याप्त उग्रानिलोद्भूतैर्जलव्यालैरिवाचलः ।

अन्योन्यदलनव्यग्रैः शस्त्रोत्पात इवोत्थितैः ।। २७

शूलासिचक्रशरशक्तिगदाभुशुण्डी-

प्रासादयो विदलनेन मिथो ध्वनन्तः ।

दीप्ता अधुर्दशदिशः शतशो भ्रमन्तः

कल्पान्तवातपरिवृत्तपदार्थलीलाम् ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे रणवर्णनं नाम पञ्चत्रिंशः सर्गः ।। ३५ ।।